# व्यासदेवस्य सामान्यचरितम्

सागरचक्रवर्ती*

संस्कृतसाहित्यगगने कृष्णद्वैपायनो महर्षिः व्यासदेवः साक्षात् ज्ञानभास्कर इव समवभासते। स न केवलं कोऽपि ऐतिहासिकः काव्यकर्ता, अपि तु भारतीयसंस्कृतेः मूलाधारः, साक्षात् विष्णुरूपः इति समाद्रियते। तदुक्तं सनातनपरम्परायाम्—

व्यासाय विष्णुरूपाय व्यासरूपाय विष्णवे।
नमो वै ब्रह्मनिधये वासिष्ठाय नमो नमः॥

### प्रादुर्भावः

द्वापरयुगस्य सन्धिकाले सत्यवत्याः पराशरमहर्षेः च तपोबलेन भगवतः विष्णोः कलावताररूपेण व्यासदेवस्य प्रादुर्भावः सञ्जातः। यमुनानद्याः कस्मिंश्चिद् द्वीपे जन्माभिव्यक्तत्वाद् अस्य महर्षेः संज्ञा द्वैपायनः इति अभवत्। श्रूयते च अस्य गात्रस्य श्यामवर्णत्वाद् अयं कृष्णः इति, बदरिकाश्रमे दीर्घकालं यावत् कठोरतपश्चर्याचरणाद् बादरायणः इति च विश्रुतो जातः। कलियुगीयानां मन्दभाग्यानां मानवानां ह्रासोन्मुखीं बुद्धिं समीक्ष्य लोकानुग्रहकामनया तेन एक एव विस्तृतः वेदराशिः ऋग्-यजुः-साम-अथर्वभेदेन चतुर्धा विभक्तः, अत एव स जगति वेदव्यासः इति नाम्ना शाश्वतीं ख्यातिं लेभे।

व्यासदेवस्य सारस्वतं साम्राज्यं निखिलब्रह्माण्डे व्याप्तमस्ति। तेन प्रणीताः ग्रन्थाः न केवलं साहित्यिकदृष्ट्या श्लाघनीयाः, अपि तु आध्यात्मिक-दार्शनिक-नैतिकदृष्ट्यापि मानवसभ्यतायाः परमोत्कृष्टाः निधयः सन्तिः।

* चतुर्थवर्षीयच्छात्रः, संस्कृतदर्शनविभागस्य, रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोधसंस्थानस्य, बेलुडमठस्य।

## महाभारतम्

एष ग्रन्थः लक्षश्लोकात्मकः सन् शतसाहस्री संहिता इति निगद्यते। अयं न केवलं कश्चिद् इतिहासः, अपितु धर्म-अर्थ-काम-मोक्षाणां ज्ञानकोशः वर्तते, येन एषः पञ्चमवेदः इति प्रथितः। अस्य ग्रन्थस्य विषये स्वयं व्यासः उद्घोषयति—"यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित्"।

## श्रीमद्भगवद्गीता

महाभारतस्य भीष्मपर्वणः उपनिषद्भूता एषा गीता विश्ववाङ्मयस्य मुकुटमणिः वर्तते । अत्र भगवता श्रीकृष्णेन व्यासमाध्यमेन अर्जुनं प्रति यः निष्कामकर्मयोगस्य, ज्ञानयोगस्य, भक्तियोगस्य च समन्वयः उपदिष्टः, सः अद्यापि दिग्भ्रान्तं मानवं प्रतिपदं मार्गं दर्शयति।

## महापुराणानि

जगति सदाचारस्य, भक्तेः, सदाशयतायाः च प्रसारार्थं व्यासेन अष्टादश महापुराणानि विरचितानि। तेषु परमहंससंहिता इति नाम्ना प्रसिद्धं श्रीमद्भागवतपुराणं रसशास्त्रस्य, वेदान्तस्य च परा काष्ठा मन्यते।

## ब्रह्मसूत्रम्

उपनिषदां परस्परविरुद्धावभासानां वाक्यानां समन्वयमुपस्थाप्य तेन शारीरकसूत्रं (ब्रह्मसूत्रम्) रचितम्, यद् उत्तरमीमांसादर्शनस्य प्रवर्तकग्रन्थः वर्तते। व्यासेन पुराणानि लिखितानि। तेषु पुराणेषु कर्तव्याकर्तव्ययोः ज्ञानविषये भक्तिसाधनादिनानाविषये च अत्यन्तं सागरतुल्यविषयाः उक्ताः, तेष्वपि सकलपुराणानां सारभूतं वचनद्वयं व्यासेन उपदिष्टाः—

अष्टादश पुराणेषु व्यासस्य वचनद्वयम्।
परोपकारः पुण्याय पापाय परपीडनम्॥

## कलावतारस्य दार्शनिकं प्रयोजनम्

व्यासदेवः भगवतः विष्णोः ज्ञानकलायाः अवतारः अस्ति। ऐश्वर्य-

वीर्यादिभिः षड्गुणैः समृद्धः भगवान् यदा सर्वशक्तीः न प्रकटीकृत्य कस्मिंश्चित् एकस्मिन् एव विशिष्टकार्ये स्वां शक्तिं विनियोज्य अवतरति, तदा सः कलावतारः इति निगद्यते। व्यासदेवस्य अवतारस्य मुख्यं प्रयोजनं ज्ञानसत्रस्य प्रचालनम् आसीत्। कलियुगे मानवानां ह्रासोन्मुखीं प्रज्ञां विचिन्त्य वैदिकज्ञानस्य रक्षणाय, तस्य सरलीकरणाय च स विष्णोः ज्ञानरूपेण धरामवातरत्। प्रज्ञावैशारद्यं साहित्यिकं च वैशिष्ट्यं व्यासस्य प्रज्ञायाः विशालता। तस्य वाग्वैदग्ध्यं च अनिर्वचनीयम् अस्ति। तस्य प्रज्ञावैशारद्यं लक्षीकृत्यैव विद्वद्भिरुच्यते— “व्यासोच्छिष्टं जगत्सर्वम्”। अर्थात् संसारे यत्किमपि ज्ञानं विद्यते तत् सर्वं व्यासदेवस्य मुखात् निर्गतम् । जगति विद्यमानं किमपि ज्ञानं व्यासस्य मेधाशक्त्या अस्पृष्टं नास्ति। किञ्च, श्रीमद्भगवद्गीतायां भगवता श्रीकृष्णेन उपदिष्टं यत् “मुनीनामप्यहं व्यासः” इति। तेन तस्य व्यासदेवस्य माहात्म्यम् अवगन्तुं शक्यते इति शम् ।